# સૌભાગ્યાષ્ટોત્તરશતનામસ્તોત્રમ્

saubhAgyAShTottarashatanAmastotram

sanskritdocuments.org

July 14, 2019

# saubhAgyAShTottarashatanAmastotram

# સૌભાગ્યાષ્ટોત્તરશતનામસ્તોત્રમ્

## Sanskrit Document Information

Text title : saubhAgyAShTottarashatanAmastotram

File name : saubhAgya108str.itx

Category : aShTottarashatanAma, devii, dashamahAvidyA, stotra, dattAtreyAnandanAtha, devI

Location : doc_devii

Author : Dattatreya

Transliterated by : Sridhar Seshagiri seshagir at engineering.sdsu.edu

Proofread by : Sridhar Seshagiri seshagir at engineering.sdsu.edu, Avinash Sathaye sohum at ms.uky.edu, NA

Description-comments : 26th adhyAya mAhAtmya khaNDam of tripurA rahasyam

Latest update : December 22, 2002, May 21, 2011

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

July 14, 2019

*sanskritdocuments.org*

# સૌભાગ્યાષ્ટોત્તરશતનામસ્તોત્રમ્

દત્તાત્રેયેણ કૃતં સૌભાગ્યાષ્ટોત્તરશતનામસ્તોત્રોપદેશવર્ણનમ્

નિશમ્યૈતજ્જામદગ્ન્યો માહાત્મ્યં સર્વતોઽધિકમ્ ।
સ્તોત્રસ્ય ભૂયઃ પપ્રચ્છ દત્તાત્રેયં ગુરૂત્તમમ્ ॥ ૧॥

ભગવન્ ત્વન્મુખામ્ભોજનિર્ગમદ્વાક્સુધારસમ્ ।
પિબતઃ શ્રોતમુખતો વર્ધતેઽનુક્ષણં તૃષા ॥ ૨॥

અષ્ટોત્તરશતં નામ્નાં શ્રીદેવ્યા યત્પ્રસાદતઃ ।
કામઃ સમ્પ્રાપ્તવાન્ લોકે સૌભાગ્યં સર્વમોહનમ્ ॥ ૩॥

સૌભાગ્યવિદ્યાવર્ણાનામુદ્ધારો યત્ર સંસ્થિતઃ ।
તત્સમાચક્ષ્વ ભગવન્ કૃપયા મયિ સેવકે ॥ ૪॥

નિશમ્યૈવં ભાર્ગવોક્તિં દત્તાત્રેયો દયાનિધિઃ ।
પ્રોવાચ ભાર્ગવં રામં મધુરાઽક્ષરપૂર્વકમ્ ॥ ૫॥

શૃણુ ભાર્ગવ ! યત્ પૃષ્ટં નામ્નામષ્ટોત્તરં શતમ્ ।
શ્રીવિદ્યાવર્ણરત્નાનાં નિધાનમિવ સંસ્થિતમ્ ॥ ૬॥

શ્રીદેવ્યા બહુધા સન્તિ નામાનિ શૃણુ ભાર્ગવ ।
સહસ્રશતસંખ્યાનિ પુરાણેષ્વાગમેષુ ચ ॥ ૭॥

તેષુ સારતમં હ્યેતત્સૌભાગ્યાઽષ્ટોત્તરાઽઽત્મકમ્ ।
યદુવાચ શિવઃ પૂર્વં ભવાન્યૈ બહુધાઽર્થિતઃ ॥ ૮॥

સૌભાગ્યાઽષ્ટોત્તરશતનામસ્તોત્રસ્ય ભાર્ગવ ।
ઋષિરુક્તઃ શિવશ્છન્દોઽનુષ્ટુપ્ શ્રીલલિતાઽમ્બિકા ॥ ૯॥

દેવતા વિન્યસેત્કૂટત્રયેણાઽઽવર્ત્ય સર્વતઃ ।
ધ્યાત્વા સમ્પૂજ્ય મનસા સ્તોત્રમેતદુદીરયેત્ ॥ ૧૦॥

॥ ત્રિપુરામ્બિકાયૈ નમઃ ॥

કામેશ્વરી કામશક્તિઃ કામસૌભાગ્યદાયિની।
કામરૂપા કામકલા કામિની કમલાઽઽસના ॥ ૧૧॥

કમલા કલ્પનાહીના કમનીયકલાવતી ।
કમલા ભારતીસેવ્યા કલ્પિતાઽશેષસંસૃતિઃ ॥ ૧૨॥

અનુત્તરાઽનઘાઽનન્તાઽદ્ભુતરૂપાઽનલોદ્ભવા ।
અતિલોકચરિત્રાઽતિસુન્દર્યતિશુભપ્રદા ॥ ૧૩॥

અઘહન્ત્ર્યતિવિસ્તારાઽર્ચનતુષ્ટાઽમિતપ્રભા ।
એકરૂપૈકવીરૈકનાથૈકાન્તાઽર્ચનપ્રિયા ॥ ૧૪॥

એકૈકભાવતુષ્ટૈકરસૈકાન્તજનપ્રિયા ।
એધમાનપ્રભાવૈધદ્ભક્તપાતકનાશિની ॥ ૧૫॥

એલામોદમુખૈનોઽદ્રિશક્રાયુધસમસ્થિતિઃ ।
ઈહાશૂન્યેપ્સિતેશાદિસેવ્યેશાનવરાઙ્ગના ॥ ૧૬॥

ઈશ્વરાઽઽજ્ઞાપિકેકારભાવ્યેપ્સિતફલપ્રદા ।
ઈશાનેતિહરેક્ષેષદરુણાક્ષીશ્વરેશ્વરી ॥ ૧૭॥

લલિતા લલનારૂપા લયહીના લસત્તનુઃ ।
લયસર્વા લયક્ષોણિર્લયકર્ણી લયાત્મિકા ॥ ૧૮॥

લઘિમા લઘુમધ્યાઽઽઢ્યા લલમાના લઘુદ્રુતા ।
હયાઽઽરૂઢા હતાઽમિત્રા હરકાન્તા હરિસ્તુતા ॥ ૧૯॥

હયગ્રીવેષ્ટદા હાલાપ્રિયા હર્ષસમુદ્ધતા ।
હર્ષણા હલ્લકાભાઙ્ગી હસ્ત્યન્તૈશ્વર્યદાયિની ॥ ૨૦॥

હલહસ્તાઽર્ચિતપદા હવિર્દાનપ્રસાદિની ।
રામરામાઽર્ચિતા રાજ્ઞી રમ્યા રવમયી રતિઃ ॥ ૨૧॥

રક્ષિણીરમણીરાકા રમણીમણ્ડલપ્રિયા ।
રક્ષિતાઽખિલલોકેશા રક્ષોગણનિષૂદિની ॥ ૨૨॥

અમ્બાન્તકારિણ્યમ્ભોજપ્રિયાઽન્તકભયઙ્કરી ।
અમ્બુરૂપાઽમ્બુજકરાઽમ્બુજજાતવરપ્રદા ॥ ૨૩॥

અન્તઃપૂજાપ્રિયાઽન્તઃસ્વરૂપિણ્યન્તર્વચોમયી ।
અન્તકાઽરાતિવામાઙ્કસ્થિતાઽન્તઃસુખરૂપિણી ॥ ૨૪॥

સર્વજ્ઞા સર્વગા સારા સમા સમસુખા સતી ।
સન્તતિઃ સન્તતા સોમા સર્વા સાઙ્ખ્યા સનાતની ॥ ૨૫॥

॥ ફલશ્રુતિઃ॥

એતત્તે કથિતં રામ નામ્નામષ્ટોત્તરં શતમ્ ।
અતિગોપ્યમિદં નામ્નઃ સર્વતઃ સારમુદ્ધૃતમ્ ॥ ૨૬॥

એતસ્ય સદૃશં સ્તોત્રં ત્રિષુ લોકેષુ દુર્લભમ્ ।
અપ્રાકશ્યમભક્તાનાં પુરતો દેવતાદ્વિષામ્ ॥ ૨૭॥

એતત્ સદાશિવો નિત્યં પઠન્ત્યન્યે હરાદયઃ ।
એતત્પ્રભાવાત્કન્દર્પસ્ત્રૈલોક્યં જયતિ ક્ષણાત્ ॥ ૨૮॥

સૌભાગ્યાઽષ્ટોત્તરશતનામસ્તોત્રં મનોહરમ્ ।
યસ્ત્રિસન્ધ્યં પઠેન્નિત્યં ન તસ્ય ભુવિ દુર્લભમ્ ॥ ૨૯॥

શ્રીવિદ્યોપાસનવતામેતદાવશ્યકં મતમ્ ।
સકૃદેતત્પ્રપઠતાં નાઽન્યત્કર્મ વિલુપ્યતે ॥ ૩૦॥

અપઠિત્વા સ્તોત્રમિદં નિત્યં નૈમિત્તિકં કૃતમ્ ।
વ્યર્થીભવતિ નગ્નેન કૃતં કર્મ યથા તથા ॥ ૩૧॥

સહસ્રનામપાઠાદાવશક્તસ્ત્વેતદીરયેત્ ।
સહસ્રનામપાઠસ્ય ફલં શતગુણં ભવેત્ ॥ ૩૨॥

સહસ્રધા પઠિત્વા તુ વીક્ષણાન્નાશયેદ્રિપૂન્ ।
કરવીરરક્તપુષ્પૈર્હુત્વા લોકાન્ વશં નયેત્ ॥ ૩૩॥

સ્તમ્ભેયત્ શ્વેતકુસુમૈર્નીલૈરુચ્ચાટયેદ્રિપૂન્ ।
મરિચૈર્વિદ્વેષેણાય લવઙ્ગૈર્વ્યાધિનાશને ॥ ૩૪॥

સુવાસિનીર્બ્રાહ્મણાન્ વા ભોજયેદ્યસ્તુ નામભિઃ ।
યશ્ચ પુષ્પૈઃ ફલૈર્વાપિ પૂજયેત્ પ્રતિનામભિઃ ॥ ૩૫॥

ચક્રરાજેઽથવાઽન્યત્ર સ વસેચ્છ્રીપુરે ચિરમ્ ।
યઃ સદા વર્તયન્નાસ્તે નામાઽષ્ટશતમુત્તમમ્ ॥ ૩૬॥

તસ્ય શ્રીલલિતા રાજ્ઞી પ્રસન્ના વાઞ્છિતપ્રદા॥

The saubhAgyAShTottarashatanAmastotram was recited by Dattatreya to Parashurama. This is a very secretive and potent text, and that is mandatory for shrIvidyopAsakA-s (verse 30, line 1). The rishi for this stotram is Lord Shiva, it is in Anushtup meter and the deity is shrIlalitAmbikA. The text is in 26th adhyAya gauryupAkhyAna of mAhAtmyakANDam in tripurA rahasya.

Encoded by Sridhar Seshagiri seshagir at engineering.sdsu.edu
Proofread by Sridhar and Avinash Sathaye

*saubhAgyAShTottarashatanAmastotram*
pdf was typeset on July 14, 2019

Please send corrections to *sanskrit@cheerful.com*